॥ उपदेशसारम् ॥

कर्तुराज्ञया प्राप्यते फलम् । कर्म किं परं कर्म तज्जडम् ॥१ ॥

कृतिमहोदधौ पतनकारणम् । फलमशाश्वतं गतिनिरोधकम् ॥२ ॥

ईश्वरार्पितं नेच्छया कृतम् । चित्तशोधकं मुक्ति साधकम् ॥३ ॥

कायवाङ्मनःकार्यमुत्तमम् । पूजनं जपश्चिन्तनं क्रमात् ॥४ ॥

जगत-ईशधी-युक्तसेवनं । अष्टमूर्तिभृद्देवपूजनम् ॥५ ॥

उत्तमस्तवादुच्चमन्दतः । चित्तजं जप-ध्यानमुत्तमम् ॥६ ॥

आज्यधारया स्रोतसा समम् । सरलचिन्तनं विरलतः परम् ॥७ ॥

भेदभावनात्सोहमित्यसौ । भावनाऽभिदा पावनी मता ॥८ ॥

भावशून्यसद्भावसुस्थितिः । भावनाबलात् भक्तिरुत्तमा ॥९ ॥

हृत्स्थले मनस्स्वस्थता क्रिया । भक्तियोगबोधाश्च निश्चितम् ॥१० ॥

वायुरोधनात् लीयते मनः । जालपक्षिवद्रोधसाधनम् ॥११ ॥

चित्तवायवश्चित्क्रियायुताः । शाखयोर्द्वयी शक्तिमूलका ॥१२ ॥

लयविनाशने उभयरोधने । लयगतं पुनर्भवति नो मृतम् ॥१३ ॥

प्राणबन्धनाल्लीनमानसम् । एकचिन्तनान्नाशमेत्यदः ॥१४ ॥

नष्टमानसोत्कृष्टयोगिनः । कृत्यमस्ति किं स्वस्थितिं यतः ॥१५ ॥

दृश्यवारितं चित्तमात्मनः । चित्वदर्शनं तत्वदर्शनम् ॥१६ ॥

मानसन्तु किं मार्गणे कृते । नैव मानसं मार्ग आर्जवात् ॥१७ ॥

वृत्तयस्त्वहं वृत्तिमाश्रिताः । वृत्तयो मनो विद्धयहं मनः ॥१८ ॥

अहमयं कुतो भवति चिन्वतः। अयि पतत्यहं निजविचारणम्॥१९॥

अहमि नाशभाज्यहमहंतया। स्फुरति हृत्स्वयं परमपूर्णसत्॥२०॥

इदमहं पदाभिख्यमन्वहम्। अहमि लीनकेऽप्यलयसत्तया॥२१॥

विग्रहेन्द्रिय प्राणधीतमः। नाहमेकसत्तज्जडं ह्यसत्॥२२॥

सत्वभासिका चित्क्ववेतरा। सत्तया हि चित् चित्तयाह्यहम्॥२३॥

ईशजीवयोर्विषधीभिदा। सत्स्वभावतो वस्तु केवलम्॥२४॥

वेषहानतः स्वात्मदर्शनम्। ईशदर्शनं स्वात्मरूपतः॥२५॥

आत्मसंस्थितिस्स्वात्मदर्शनम्। आत्मनिर्द्वयादात्मनिष्ठता॥२६॥

ज्ञानवर्जिताऽज्ञानहीनचित्। ज्ञानमस्ति किं ज्ञातुमन्तरम्॥२८॥

किं स्वरूपमित्यात्मदर्शने। अव्ययाऽभवाऽऽपूर्णचित्सुखम्॥२८॥

बन्धमुक्त्यतीतं परं सुखम्। विन्दतीह जीवस्तुदैविकः॥२९॥

अहमपेतकं निजविभानकम्। महदिदं तपो रमणवागियम्॥३०॥

जयन्ति रमणाचार्यं पादपाथोजरेणवः।

विरजस्का विराजन्ते यच्छिरस्का नरालयः॥१॥